चतुर्थः पाठः

# हास्यकणिकाः

1. **न्यायाधीशः** – भोः! किं त्वं जानासि, यदि असत्यं वदिष्यसि तर्हि कुत्र गमिष्यसि?
**अपराधी** – आम् श्रीमन्! नरकं गमिष्यामि।
**न्यायाधीशः** – अथ चेत् सत्यं वदिष्यसि तर्हि?
**अपराधी** – कारागारं गमिष्यामि श्रीमन्।

2. **गुरुः** (छात्रान् प्रति) – यदि अत्र देवः प्रत्यक्षः भवेत् तर्हि भवन्तः किं किं प्रार्थयेयुः?
**प्रथमः छात्रः** – अहं तु धनं प्रार्थयिष्यामि।
**द्वितीयः छात्रः** – अहं तु गृहं प्रार्थयिष्यामि।
**तृतीयः छात्रः** – अहं तु प्रभुत्वं प्रार्थयिष्यामि।
**गुरुः** – भवन्तः सर्वे मूर्खाः सन्ति। अहं तु विद्यां बुद्धिं च प्रार्थयिष्यामि।
**छात्राः** – यस्मिन् यत् नास्ति तदेव सः प्रार्थयति, गुरुवर्य!

3. **पतिः** (उच्चैः, पत्नीं प्रति) – मम स्नानाय उष्णं जलं शीघ्रम् आन, अन्यथा............।
**पत्नी** (सक्रोधम्) – अन्यथा भवान् किं करिष्यति?
**पतिः** (ससम्भ्रमम्) – किं करिष्यामि? शीतलैः जलैः एव स्नानं करिष्यामि।

4. **मातुलः** (श्रीधरं प्रति) – वत्स, त्वं कथं न स्वाध्ययनं करोषि? किं त्वं जानासि यत् पं० जवाहर लाल नेहरूः यदा तव वयसि आसीत् तदा सः स्वकक्षायां प्रथमं स्थानं प्राप्नोति स्म?
**श्रीधरः** – जानामि मातुल! जानामि, पं० जवाहर लाल नेहरूः यदा भवतः वयसि आसीत् तदा सः भारतदेशस्य प्रधानमंत्री आसीत्।

5. जनकः (अंकपत्रं दृष्ट्वा सक्रोधं पुत्रं प्रति)

– धिक् वत्स, किमिदम्? आङ्ग्लभाषायां षट्त्रिंशत्, गणितविषये पञ्चत्रिंशत्, विज्ञानविषयेऽपि पञ्चत्रिंशत् हिन्दीभाषायां सप्तत्रिंशत् अङ्काः त्वया लब्धाः। धिक् त्वां धिक्!

माता (पतिं प्रति) – स्वामिन्! इदं पुत्रस्य अङ्कपत्रं नास्ति। इदं तु भवतः अङ्कपत्रम् अस्ति। इदं मया भवतः पेटिकायां प्राप्तम्।

6. एकदा त्रयः जनाः (अमेरिकादेशीयः, नाइजीरियादेशीयः, अन्यदेशस्य ईर्ष्यालुः च) भगवतः शिवस्य तपस्याम् अकुर्वन्। तेषां तपसा प्रसन्नो भूत्वा शिवः प्रत्यक्षः अभवत् अकथयत् च- पुत्र, वरं वरय।

प्रथमः – भगवन्, धनं ददातु।

शिवः – तथास्तु।

द्वितीयः – भगवन्, मह्यं गौरवर्णं ददातु।

शिवः – तथास्तु।

तृतीयः – (प्रथमस्य द्वितीयस्य च धनं रूपं च दृष्ट्वा ईर्ष्यावशात्)- भगवन्, प्रथमं द्वितीयं च पूर्ववत् करोतु।

## अभ्यासः

1. जीवने हासस्य का आवश्यकता वर्तते?
2. हासस्य का परिभाषा?